षट्प्रज्ञ:, पुं, (षट्सु रसेषु प्रज्ञा यस्य।) कामुक:। यथा,—
"षिड़्गो व्यलीक: षट्प्रज्ञ: कामकेलिर्व्विदूषक:
पौठकेलि: पीठमर्द्दो भविलम्छिद्रुरो विट: ॥"
इति त्रिकाण्डशेष: ॥
(षट्सु धर्म्मादिषु प्रज्ञा यस्य।) धर्म्मादि-शास्त्रविज्ञ:। यथा,—
"धर्म्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि।
षट्सु प्रज्ञास्ति यस्योच्चै: स षट्प्रज्ञ इति स्मृत:॥"
इति च त्रिकाण्डशेष: ॥

षड़क्षीण:, पुं (षट्सु रसेषु अक्षीण:।) मत्स्य:। इति केचित् ॥

षड़ङ्गं, क्ली, (षण्णां अङ्गानां समाहार:। शरीरस्य षड़वयवम्। यथा,—
"जङ्घे बाहू शिरो मध्यं षड़ङ्गमिदमुच्यते ॥"
इति शब्दचन्द्रिका ॥
वेदाङ्गषट्शास्त्राणि। यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा।
छन्दश्चेति षड़ङ्गानि वेदानां वैदिका विदु: ॥"
इति शब्दरत्नावली ॥*॥
अपि च। अङ्गान्याह शिक्षापद्यम्।
"छन्द:पादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते।
ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते ॥
शिक्षाघ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥"
इति तिथ्यादितत्त्वम् ॥*॥
श्राद्धश्राद्धीयदानाङ्गपीठादिकम्। इति लोकप्रसिद्धम् ॥*॥ षट्प्रकारगव्यविशेष:। यथा,—
"गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना।
षड़ङ्गमेतन्माङ्गल्यं पवित्रं सर्व्वदा गवाम् ॥
इति स्मृति: ॥ * ॥
हृदयादिषड़वयवम्। तत्प्रमाणं न्यासशब्दे द्रष्टव्यम् ॥

षड़ङ्ग:, पुं, (षट् अङ्गानि यस्य।) क्षुद्रगोक्षुरक:। इति राजनिर्घण्ट: ॥ (वेद:। यथा,—
"शिक्षाकल्पौ व्याकरणं निरुक्तं छन्दसाञ्चय:।
ज्योतिषामयनञ्चैव षड़ङ्गो वेद उच्यते ॥")

षड़ङ्गजित्, पुं, (षड़ङ्गं जितवानिति। जि + क्विप्।) विष्णु:। इति शब्दमाला ॥ षड़ङ्गजेतरि, त्रि ॥

षड़भिज्ञ:, पुं, (षट्सु धर्म्मार्थकाममोक्षलोकतत्त्वार्थेषु अभिज्ञा यस्य। बुद्ध: ॥ इत्यमर: ॥

षड़शीति:, स्त्री, रविसंक्रान्तिविशेष:। सा तु मिथुनकन्याधनुर्म्मीनराशिषु भवति। यथा, भविष्यमाल्यज्योतिषम्।
"मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने।
विषुवती तुलामेष गोलमध्ये तथापरा: ॥
धनुर्म्मिथुनकन्यासु मीने च षड़शीतय:।
वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता ॥"
इति तिथ्यादितत्त्वम्॥
अस्या: पुण्यकाल: संक्रान्तिशब्दे द्रष्टव्य: ॥*॥ षड़धिकाशीतिसंख्या। इत्यङ्कशास्त्रम् ॥ छेयाशी इति भाषा ॥

षड़शीतिचक्रं, क्ली, (षड़शीतेश्चक्रम्।) मिथुनकन्याधनुर्म्मीनराशिस्थरवे: शुभाशुभफलज्ञानार्थं नक्षत्राङ्कनराकारचक्रम्। यथा,—
"मुखे चैकं करे वेदा: पादयुग्मे द्वयं द्वयम्।
क्रोड़े बाणास्तथा वेदा: करे सव्येतरेऽपि च ॥
द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा।
द्वयञ्चैव तथा गुह्ये षड़शीत्यां रवौ स्थिते ॥
मुखे दु:खं करे लाभ: पादयोर्भ्रमणं हृदि।
कान्ता स्याद्दक्षिणे वामे हस्ते स्यात् स्त्रीयमे नृणाम् ॥
सम्मानं नेत्रयोश्चैव अपमानश्च मस्तके।
गुह्ये चैव भवेन्मृत्यु: षड़शीतिफलस्तुति: ॥"
इति ज्योतिस्तत्त्वम ॥

षड़ष्टकं, क्ली, योगविशेष:। स तु वरकन्ययो: स्वस्वराश्यपेक्षया परस्परषष्ठाष्टमराशिसम्बन्ध: स च मित्रारिभेदेन द्विविध:। तत्र मित्रषड़ष्टकं यथा। श्रीपतिरत्नमालायाम्।
"मकरसमेतं मिथुनं कन्याकलसौ मृगेन्द्र-मीनौ च।
वृषभतुले अलिमेषौ कर्कटधनुषी च मित्र-विधौ ॥"
षड़ष्टकाविति शेष: ॥*॥ अरिषड़ष्टकमाह।
"मकर: करिकुलरिपुना
कन्या मेषेण सह भषस्तुलया।
कर्किघटौ वृषधनुषौ
वृश्चिकमिथुने चारिविधौ ॥
यदि कन्याष्टमे भर्त्ता भर्त्तु: षष्ठे च कन्यका।
षड़ष्टकं विजानीयात् वर्ज्जितं त्रिदशैरपि॥"*
षड़ष्टकादौ तारानियममाह। भीमपराक्रम:।
'सौहृद्ये ह्युभयोर्द्वयोरपि तयोरैकाधिपत्येऽपि वा
ताराषट्‌ च सुमित्रमित्रजननक्षेमार्थसम्पद्यदि
षट्काष्टे नव पञ्चके व्ययधने योगे च युंयोषितो:
प्रीत्यायु:सुखवृद्धिपुष्टिजनक: कार्य्यो विवाहस्तदा ॥"
गर्ग:।
"मरणं तारविरोधे ग्रहरिपुभावे चिरेण।
रोगादि नरनार्य्यो: षट्काष्टे वैरं भवेदाशु ॥"
व्यास:।
"मैत्रादियोगेऽपि षड़ष्टकादौ
तारा विपत्प्रत्यरिनैधनाख्या:।
वर्ज्या विवाहे पुरुषोडुतो हि
प्रीति: परा जन्मसु तारकासु ॥"
इति ज्योतिस्तत्त्वम् ॥*॥
मतान्तरं यथा,—
"सिंहेन मकर: श्रेष्ठो कन्यया मेष उत्तम:।
तुलया सह मीनस्तु कुम्भेन सह कर्कट: ॥
धनुषा वृषभ: श्रेष्ठो मिथुनेन च वृश्चिक:।
एतत् षड़ष्टकं प्रीत्यै भवत्येव न संशय: ॥"
इति गारुड़े ६१ अध्याय: ॥

षड़ानन:, पुं, (कृत्तिकादीनां षण्णां स्तनपानार्थं षट् आननानि यस्य।) कार्त्तिकेय:। इत्यमर:॥ (यथा, महाभारते। ३। २३१। २०।
"स्तोष्यामि देवैर्ऋषिभिश्च जुष्टं
भक्त्या गुहं नामभिरप्रमेयम्।
षड़ाननं शक्तिधरं सुवीरं
निबोध चैतानि कुरुप्रवीर! ॥")
तस्य कार्त्तिकेयनामकारणं यथा,—
"अग्निपुत्त्र: कुमारस्तु शरस्तम्बे व्यजायत।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठज: ॥
अपत्यं कृत्तिकानाञ्च कार्त्तिकेयस्तत: स्मृत:॥"
इति मात्स्ये ५ अध्याय: ॥
(षट्सु वदनेषु, क्ली। यथा, रघ:। १४। २२।
"सर्व्वासु मातृष्वपि वत्सलत्वात्
स निर्व्विशेषप्रतिपत्तिरासीत्।
षड़ाननापीतपयोधरासु
नेता चमूनामिव कृत्तिकासु ॥")

षड़ाम्नाया:, पुं, (षट् आम्नाया:।) शिवस्य षड्वक्त्रविनिर्गतषट्प्रकारतन्त्रशास्त्रम्। यथा,
श्रीशिव उवाच।
"अथेदानीं प्रवक्ष्यामि आम्नायकथनं पृथक्।
पूर्व्वाम्नायो यदा मन्त्रस्तदा प्राचीदिशि स्थित
सदाशिवोऽहं भगवानाचार: परिकीर्त्तित:।
एवं वै दक्षिणाम्नायो दक्षिणस्यां दिशि स्थित
एवं हि पश्चिमाम्नाय: पश्चिमायां दिशि स्थित
एवमेवोत्तराम्नाय उत्तरस्यां दिशि स्थित: ॥
मुखमूर्द्धक्रतं देवि! यत् प्रोक्तं तव सन्निधौ।
ऊर्द्धाम्नायश्च कथितो देवानामपि दुर्ल्लभ: ॥
यदा चाधोमुखं देवि यत् प्रोक्तं गिरिजे प्रिये।
अध आम्नाय इत्युक्त: सत्यं सत्यं सुमध्यमे।
षड़ाम्नायाश्च कथिताश्चोत्पत्तिक्रमनामत: ॥*॥
यस्मिन् यस्मिंश्च ये देवा: कथिताश्च वरानने।
तान्देवांश्च प्रवक्ष्यामि साधकानां हिताय वै ॥
श्रीविद्याभेदसहिता तारा च त्रिपुरा तथा।
भुवनेशी चान्नपूर्णा पूर्व्वाम्नाये प्रकीर्त्तिता: ॥
वगलामुखी च वशिनी त्वरिता धनदा तथा।
वशिनी बालभैरवोत्यर्थ:।
महिषघ्नी महालक्ष्मीर्दक्षिणाम्नायकीर्त्तिता: ॥
महासरस्वती विद्या तथा वाग्वादिनी परा।
प्रत्यङ्गिरा भवानी च पश्चिमाम्नायकीर्त्तिता: ॥
कालिका भेदसहिता ताराभेदैश्च संयुता।
मातङ्गी भैरवी च्छिन्ना तथा धूमावती परा।
उत्तराम्नायकथिता: कलौ शीघ्रफलप्रदा: ॥
समस्तभेदसहिता: कालिकाया: प्रकीर्त्तिता:।
द्वाविंशत्यक्षरी तासां दक्षिणाम्नायकीर्त्तिता ॥
एकजटा षड़ाम्नाये महामोक्षप्रदायिनी।
तत्परा परमा विद्या न विद्यान्तरगोपिता॥
परप्रसादमन्त्रश्च ऊर्द्धाम्नाये प्रकीर्त्तित:।
वागीश्वरादयो देवा अध आम्नायकीर्त्तिता: ॥
ऊर्द्धाम्नायो अधश्चैव केवलं मोक्षदो भवेत्।
धर्म्मार्थकाममोक्षार्थं आम्नायान्ये प्रकीर्त्तिता:॥
यथोक्तविधिना भद्रे कृत्वा फलमवाप्नुयात्॥*॥
पूर्व्वाम्नायादिसर्व्वासां विधानं शृणु सुन्दरि।
कृत्वा येनाशु लभते फलं यदुत्तमोत्तमम् ॥
षट्कर्म्मफलदा नृणां षड़ाम्नाया: प्रकीर्त्तिता:।